# Vajravilasinisadhana Stava

# વજ્રવિલાસિનીસાધનાસ્તવઃ

## Document Information

Text title : Vajravilasinisadhana Stava

File name : vajravilAsinIsAdhanAstavaH.itx

Category : devii, devI, buddha, stava

Location : doc_devii

Transliterated by : DSBC staff

Proofread by : Miroj Shakya

Acknowledge-Permission: Prof. Miroj Shakya, Text Nagarjuna Institute of Exact Methods, Digital Sanskrit Buddhist Canon Project, University of the West https://www.dsbcproject.org/

Latest update : March 8, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2025

*sanskritdocuments.org*

# વજ્રવિલાસિનીસાધનાસ્તવઃ

રવિવિકસ્વરભાસ્વરસુન્દરીપ્રબલકેશરસંવરકર્ણિકાત્ ।
ઉદયમસ્તકશૃઙ્ગસમુલ્લસન્નવસુપૂર્ણશશાઙ્કકરાઙ્કિતામ્ ॥ ૧॥

વિવિધપુષ્પરસાસવવેદ્યપિ દ્રુતવિલમ્બિતમધ્યનદદ્ધ્વનિઃ ।
અલિરુપેત્ય નિશાર્ધમહોત્સવે ધયતિ તદ્ગતધીરિતિ વિસ્મયઃ ॥ ૨॥

ઉદયતેઽસ્તમુપૈતિ નિશાકરઃ પુનરતોઽપ્યુદયાચલમૌલિતામ્ ।
ઉભયકોટિકલાપિનિરીક્ષણે ન ચ શશી ન વિભાતિ દિવાકરઃ ॥ ૩॥

રવિરુદેતિ સરોજદલાન્તરે શિખરતોઽપિ વિધુઃ પ્રવિલીયતે ।
વ્રજતિ ચોર્ધ્વમસૌ વડવાનલો ગિલતિ રાહુરધઃ શશિભાસ્કરૌ ॥ ૪॥

કમલિનીકમલાસનલોચનપ્રકટગોચરગોચરમીલનમ્ ।
પ્રથમમઙ્ગમિદં કુલિશામ્બુજદ્વયનિમીલનમત્ર તતોઽપરમ્ ॥ ૫॥

સપદિ સાધકબીજનિઘર્ષણાત્ ત્રિતયમમ્બરમેતિ ચતુર્થકમ્ ।
સહજમક્ષયધામકલાવલીકલિતકાલવિલાપનલેલિહમ્ ॥ ૬॥

યદિ સુશિક્ષિતવજ્રવિલાસિનીગુરુમુખાધિગમોઽધિગતો ભવેત્ ।
ભવતિ યસ્ય તદોત્તમમધ્યમાધમવિનિશ્ચયમેતિ સ તત્ત્વદૃક્ ॥ ૭॥

ઇતિ શ્રીવજ્રવિલાસિનીસાધનાસ્તવઃ સમાપ્તઃ ॥

*Vajravilasinisadhana Stava*
pdf was typeset on March 8, 2025

Please send corrections to *sanskrit@cheerful.com*